outside the house, and is therefore used as an illustration of anything which fulfills a double purpose. यथा प्रासादे कृतः प्रदीपः सन्निधानाद्राजमार्गेऽप्युपकरोति। ŚB. on MS. 12. 1. 3. cf. काकाक्षिगोलकन्याय and जामात्रर्थं श्रपितस्य सूपादेरतिथ्युपकारकत्वम्.

**द्विर्बद्धं सुबद्धं भवति** (The figure of) a thing fastened twice becomes neatly fastened. If an additional support or proof is accorded to a thing already proved the thing is proven beyond doubt.

**धनंजयन्यायः** The simile of Arjuna. It is used to show that something, though once done, may be done again, as in the case of Arjuna who defeated the Kuru race after Krisna had already defeated them. cf. नित्यबोधमहिम्ना बाधितेऽपि द्वैते वाक्यजबोधस्य धनंजयन्यायेन बाधकत्वोपपत्तेः। यथाहुः 'नित्यबोधपरिपीडितं जगद्विभ्रमं नुदति वाक्यजा मतिः। वासुदेवनिहतं धनंजयो हन्ति कौरवकुलं यथा पुनः। रघुनाथ; मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्। Bg. 11. 33; मया हतास्त्वं जहि मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान्। ibid. 34.

**धनुर्गुणन्यायः** The simile of [fastening] rope to a bow. The archers apply rope to the curved bow; similarly the good superimpose good qualities on the wicked. cf. आजन्मतोऽतिकुटिलेऽपि जने महान्तस्त्वारोपयन्ति हि गुणं धनुषीव शूराः॥ सायण.

**धान्यपलालन्यायः** The simile of grain and its husk. cf. Mbh. 1. 2. 39; 3. 3. 18; 3. 4. 21; 4. 1. 92. अवर्जनीयतया दुःखमागतमपि परिहृत्य सुखमात्रं भोक्ष्यते। तद्यथा—मत्स्यार्थी सशल्कान् सकण्टकान् मत्स्यानुपादत्ते स यावदादेयं तावदादाय विनिवर्तते। यथा वा धान्यार्थी सपलालानि धान्यान्याहरति स यावदादेयं तावदादाय निवर्तते। Sar. S. 1. The nyāya seems to have a different application in Marāṭhī literature according to Molesworth. "The law of the corn and its straw. Conquer the king and you conquer his subjects; accomplish or acquire a matter and you attain all it sustains or involves."

**न खलु धीमतां कश्चिदविषयो नाम** (Ś. 4) There is, indeed, nothing which is beyond the ken of their understanding to the intelligent.

**न खलु शालग्रामे किरातशतसंकीर्णे प्रतिवसन्नपि ब्राह्मणः किरातो भवति** A Brahmaṇa does not become a Kirāta by living on the Sālagrāma mountain filled with hundreds of barbarians! This is equivalent to the English proverb. "A horse does not become an ass by being born in the stable of the latter." cf. न ह्यश्वस्थाने गां पश्यन्नश्वोऽयमित्यमूढोऽध्यवस्यति। Ś. B. on Br. Sūt. 1. 4. 1; अन्यथा किरातशतसंकीर्णदेशनिवासिनो ब्राह्मणजनस्यापि किरातत्वापत्तेः। भामती 1. 1. 5.

**न च सर्वत्र तुल्यत्वं स्यात् प्रयोजककर्मणाम्** Acts which impel others to action are not always of the same kind. Read: न च सर्वत्र तुल्यत्वं स्यात् प्रयोजककर्मणाम्। चलनेन ह्यसिं योद्धा प्रयुङ्क्ते छेदनं प्रति॥ सेनापतिस्तु वाचैव भृत्यानां विनियोजकः। राजा संनिधिमात्रेण विनियुङ्क्ते कदाचन॥ श्लोकवार्तिक; स त्वनश्नन्नन्योऽभिचाकशीति पश्यत्येव केवलम्। दर्शनमात्रेण हि तस्य प्रेरयितृत्वं राजवत्॥ Saṁkara on Muṇḍa. 3. 1. 1.

**नटाङ्गनान्यायः** The simile of a wife of an actor. When an actor asks an actress on the stage as to whose wife she was, her answer was that she was his wife. Consonants, in language, resemble नटाङ्गना. व्यञ्जनानि पुनर्नटभार्यावद्भवन्तीति। यथा नटानां स्त्रियो रङ्गगता यो यः पृच्छति कस्य यूयं कस्य यूयमिति तं तं तव तव इत्याहुः। एवं व्यञ्जनानि अपि यस्य यस्य अचः (vowel) कार्यमुच्यते तं तं भजन्ते। लौ. न्याय.

**नदीसमुद्रन्यायः** The simile of a river going to the ocean. As every river becomes one with ocean, irrespective of name and form, every devotee becomes united with the Lord. यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय। तथा विद्वान् पुण्यपापे विधूय परात्परं पुरुषमुपैति दिव्यम्॥

**न धर्मवृद्धेषु वयः समीक्ष्यते** In case of those who are rich in piety, age is not of moment. cf. कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनीम्। दिदृक्षवस्तामृषयोऽभ्युपागमन्न धर्मवृद्धेषु वयः समीक्ष्यते॥ Ku. 5. 16; न तेन वृद्धो भवति येनास्य पलितं शिरः। यो वै युवाप्यधीयानस्तं देवाः स्थविरं विदुः॥ Ms. 2. 156; तेजसां हि न वयः समीक्ष्यते। R. 11. 3; शिशुत्वं स्त्रैणं वा भवतु ननु वन्द्यासि जगतां गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः॥ U. 4. 11; प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः॥ Subhāṣ.

**न यद्गिरिशृङ्गमारुह्य गृह्यते तदप्रत्यक्षम्** A thing does not become imperceptible because perceived by one who has ascended a mountain peak. cf. ननु यदि श्रोत्रकरणकेनैव प्रत्ययेन साधुत्वासाधुत्वे प्रतिपत्तारः प्रतिपद्यन्ते व्याकरणाध्ययनबन्ध्यबुद्धयोऽपि प्रतिपद्येरन्। न च प्रतिपद्यन्ते तस्मान्न ते इन्द्रियविषये इति। नैष दोषः। वैयाकरणोपदेशसाहायकोपकृतश्रोत्रेन्द्रियग्राह्यत्वाभ्युपगमात्। यथा ब्राह्मणत्वादिजातिरुपदेशसव्यपेक्षचक्षुरिन्द्रियग्राह्यापि न प्रत्यक्षगम्यतामपोज्झति। यथाह न यद्गिरिशृङ्गमारुह्य गृह्यते तदप्रत्यक्षमिति। तंत्र. 1. 2. 2.

**नरसिंहन्यायः** The simile of the union of man and lion. It is used to illustrate a particular kind of Alaṁkāra consisting of a combination of figures. See क्षीरनीरन्याय.

**नर्तकन्यायः** The simile of a dancer. One dancer gives pleasure to many spectators, just as one lamp gives light to many persons. cf. प्रत्यङ्गकार्याण्यङ्गानि तन्त्रेणोताङ्गिनो यतः। एकैकस्योपकारकत्वं तस्मात् प्रत्यङ्ग्यनुष्ठितिः॥ विधानवदनुष्ठानं सकृदेवोपकारकम्। तद्देशकालकर्तॄणामेकत्वान्नर्तकादिवत्॥ J. N. V. 11. 1. 10.

**नष्टाश्वदग्धरथन्यायः** The maxim of the lost horses and burnt chariot. This is based on the story of two men travelling in their respective chariots, and one of them losing his horses and the other having his chariot burnt, through the outbreak of a fire in the village in which they were putting up for the night. The horses